# Shri Mahamari Sahasranama Stotram

# શ્રીમહામારીસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : mahAmArIsahasranAmastotram

File name : mahAmArIsahasranAmastotram.itx

Category : devii, sahasranAma, devI, otherforms

Location : doc_devii

Author : Kittu Sir - Sri. T. S. Krishnamoorthy shAstri, Tetiyur, Tamil Nadu, India (1950)

Transliterated by : Sankara Dass Nagoji nagojip at gmail.com https://www.kanchimatamkudanthai.org

Proofread by : Dr. Veezhinathan, Mrs. Renuka Kamakoti, PSA Easwaran

Description/comments : See corresponding nAmAvalI

Latest update : September 13, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 13, 2020

*sanskritdocuments.org*

# શ્રીમહામારીસહસ્રનામસ્તોત્રમ્

ૐ શુક્લામ્બરધરં વિષ્ણું શશિવર્ણં ચતુર્ભુજમ્ ।
પ્રસન્નવદનં ધ્યાયેત્ સર્વવિઘ્નોપશાન્તયે ॥

ૐ મહામારી મહામાયા મહામહિષવાહના ।
મદ્યપાનરતા મત્તા મધુકૈટભમર્દિની ॥ ૧॥

મન્યુવૃત્તા મહાદેવી મદિરાપાનલમ્પટા ।
મહાહન્તા મહાશાન્તા મહાકીર્તિર્મહાબલા ॥ ૨॥

મહાશક્તિર્મહાવીર્યા મહાવેગા મનીષિણી ।
મહોત્પલધરા મન્યુભીષણા મહિમાલયા ॥ ૩॥

મહારૂપા મહાક્રૂરા મહામન્ત્રા મહાયુધા ।
મહાભક્ષા મહાલક્ષ્મીર્મહાકાળી મહોત્સવા ॥ ૪॥

મસ્તકાગ્નિર્મહાહાસા મહિતા મદ્યલોલુપા ।
મરુદ્ગણા મદોન્મત્તા મહાતલનિવાસિની ॥ ૫॥

મજ્જા મલયજા મલ્લા મન્દહાસોજ્જ્વલન્મુખી ।
મહાન્ધકારશમની મહારણ્યાલયસ્થિતા ॥ ૬॥

મનોજ્ઞા મહિતોદન્તા મદઘૂર્ણિતલોચના ।
મહાશ્રયા મહામુખ્યા મહાજિહ્વા મલાપહા ॥ ૭॥

મહાપદ્મવનાન્તસ્થા મઞ્જુલા મઙ્ગલાલયા ।
મહેચ્છા મન્મથસ્તુત્યા મદના મદમોહિની ॥ ૮॥

મર્મસ્પૃશા મત્સ્યલોલા મહેશી મઞ્જુભાષિણી ।
મનસ્વિની મહોદ્વેગા મહાસઙ્કટહારિણી ॥ ૯॥

મહાસત્ત્વા મહાનન્દા મહાકામા મહાશના ।
મહાભગવતી મહ્યા મહારાવા મનોન્મની ॥ ૧૦॥

મહાનલપદાચારા મહાજનવરપ્રદા ।
મહાકામેશ્વરીદૂતી મહાકાલાગ્નિરૂપિણી ॥ ૧૧॥

મકારાદિક્ષકારાન્તવર્ણમાલાવિલાસિની ।
મહિલા મન્દહાસાસ્યા મહારાજ્યપ્રદાયિની ॥ ૧૨॥

મહાઙ્કુશા મહાનાદા મહાદુર્ગા મહેશ્વરી ।
મહાવેશા મહાઢક્કાધરા મઙ્ગલદાયિની ॥ ૧૩॥

મઙ્ગલા મધુરાલાપા મહાવેતાલમર્દિની ।
મહાગૌરી મહામાતા મહાકોલાહલપ્રિયા ॥ ૧૪॥

મહાપિષ્ટાશનપ્રીતા મહાવિસ્ફોટરૂપિણી ।
મહાચણ્ડી મહાવીરા મહાગ્રાસા મહીમયી ॥ ૧૫॥

મહામોહાન્ધકારઘ્ની મહાદારિદ્ર્યનાશિની ।
મહાશૂલા મહેષ્વાસા મહાકાશનિવાસિની ॥ ૧૬॥

મહારોગપ્રશમની મહાભયવિનાશિની ।
મહેશી મન્દગમના મન્દહાસોજ્જ્વલન્મુખી ॥ ૧૭॥

મદાલસગતિર્મન્ત્રરૂપિણી મમતા મતિઃ ।
મયૂરપિચ્છિકોત્તંસા મહાલાવણ્યશાલિની ॥ ૧૮॥

મહાહિવલયા મન્યુઘોષણા મધુરાકૃતિઃ ।
મહિષઘ્ની મહાનિષ્ઠા મથુરાપુરનાયિકા ॥ ૧૯॥

મહાન્યાસપ્રિયા મધ્યમા માનસવિહારિણી ।
મારી માયા માનનીયા માધવપ્રિયસોદરી ॥ ૨૦॥

માતા માલાવિભૂષા મા માદિની માર્ગદર્શિની ।
માગધીવનમધ્યસ્થા માષાન્નપ્રીતમાનસા ॥ ૨૧॥

માહેશ્વરી માનસૌકવાહના માસરુપિણી ।
માયાહતાસુરગણા માતૃમણ્ડલમધ્યગા ॥ ૨૨॥

માલિની માલતીજાતીમલ્લિકાદિસમર્ચિતા ।
મિત્રપ્રિયા મિત્રપૂજ્યા મિહિરારુણભાસ્વરા ॥ ૨૩॥

મીમાંસા મીનનયના મીનકેતનપૂજિતા ।
મીનાક્ષી મુદ્ગરધરા મુણ્ડિની મુણ્ડમાલિની ॥ ૨૪॥

મુખ્યા મુક્તાવલીભૂષા મુનિમાનસહંસિની ।
મુણ્ડાદિદૈત્યદર્પઘ્ની મુસલાયુધધારિણી ॥ ૨૫॥

મૂલમન્ત્રાત્મિકા મૂલાધારપદ્માસનસ્થિતા ।
મૂર્તા મૂકાસુરહરા મૂલકર્મવિનાશિની ॥ ૨૬॥

મૃગનાભિલસત્કણ્ઠી મૃદ્વઙ્ગી મૃગવાહના ।
મૃદુપાદામ્બુજા મૃગ્યા મૃદુલા મૃત્યુનાશિની ॥ ૨૭॥

મૃણાલિકા તન્તુનિભા મૃગનાભિવિલેપના ।
મૃગાઙ્કમુકુટા મૃત્યુમારી મૃત્યુઞ્જયપ્રિયા ॥ ૨૮॥

મેધા મેધાવતી મેઘચારિણી મેખલાવતી ।
મૈરેયપાનસુપ્રીતા મોહધ્વાન્તદિવાકરા ॥ ૨૯॥

મોહા મોહપ્રદા મોહનાશિની મોક્ષદાયિની ।
મૌઞ્જી મૌઞ્જીધરા મૌલિસર્પા મૌનિજનપ્રિયા ॥ ૩૦॥

મન્દારકુસુમપ્રખ્યા મન્ત્રજ્ઞા મન્ત્રરૂપિણી ।
મઙ્ક્ષુપ્રસન્નવદના મઞ્જુલા મઙ્ગલપ્રદા ॥ ૩૧॥

માંસલા માંસનિલયા માંસભક્ષણલાલસા ।
યશસ્વિની યતાહારા યમબાધાવિનાશિની ॥ ૩૨॥

યજ્ઞોપવીતિની યજ્ઞફલદા યતમાનસા ।
યથાર્થવચના યન્ત્રનિલયા યજ્ઞરક્ષિણી ॥ ૩૩॥

યજ્ઞમાતા યજ્ઞભોક્ત્રી યજ્ઞેશી યજ્ઞસમ્ભવા ।
યજ્ઞક્રિયા યજ્ઞરૂપા યજ્ઞાઙ્ગી યન્ત્રમધ્યગા ॥ ૩૪॥

યવાગૂપાનસુપ્રીતા યજ્ઞધૂપકુતૂહલા ।
યમુના યરલવાકારા યક્ષરાજ્ઞી યજુઃસ્વરા ॥ ૩૫॥

યશોદા યન્ત્રનટના યક્ષ્મરોગવિનાશિની ।
યમા યક્ષ્મહરા યષ્ટિધારિણી યજનપ્રિયા ॥ ૩૬॥

યક્ષિણી યક્ષગન્ધર્વપૂજિતા યમરૂપિણી ।
યામિની યામિનીનાથપૂજિતા યાનવાહિની ॥ ૩૭॥

યાત્રિકૈકસહાયા યા યામિનીમધ્યચારિણી ।

યામસઞ્ચારિણી યાગરક્ષિણી યાગસમ્ભવા ॥ ૩૮॥

યુવતિર્યુદ્ધનિપુણા યુગાન્તાગ્નિવિલોચના ।
યુક્તા યુગપરા યુદ્ધરેણુકા યુદ્ધદુર્મદા ॥ ૩૯॥

યૂથમધ્યા યૂથસેવ્યા યૂપબદ્ધબલિપ્રિયા ।
યોષા યોધા યોગનિષ્ઠા યોગિનીગણમધ્યગા ॥ ૪૦॥

યોગપ્રદા યોગરૂપા યોગિની યોધકારિણી ।
યોગાસના યોગનિદ્રા યોગ્યા યોગિજનપ્રિયા ॥ ૪૧॥

યોગગમ્યા યોગપરા યોગિહૃત્પદ્મવાસિની ।
યોષિત્પૂજનસુપ્રીતા યોષિત્ યોષિત્સ્વરૂપિણી ॥ ૪૨॥

યોક્ત્રી યૌવનમધ્યસ્થા યન્ત્રબિન્દ્વર્ચનપ્રિયા ।
રક્તામ્બરા રક્તમુખી રક્તાક્ષી રક્તપાયિની ॥ ૪૩॥

રક્તાભિષેકસન્તુષ્ટા રવિમણ્ડલમધ્યગા ।
રક્તોત્પલધરા રક્તનિલયા રજનીપ્રિયા ॥ ૪૪॥

રક્ષા રક્ષાકરી રત્નભૂષણા રજનીચરા ।
રમ્યા રમા રસમયી રજનીકરશેખરા ॥ ૪૫॥

રમણી રામજનની રમ્ભા રમણલમ્પટા ।
રમ્ભાફલપ્રિયા રત્નકટકા રણભૈરવી ॥ ૪૬॥

રજસ્વલા રજોરૂપા રસાભિજ્ઞા રજોગુણા ।
રથિની રજતાકારા રતા રતિપતિપ્રિયા ॥ ૪૭॥

રસાલયા રજ્જુહસ્તા રવિનેત્રા રતિપ્રિયા ।
રઞ્જિની રણસન્તુષ્ટા રક્ષોઘ્ની રણકાલિકા ॥ ૪૮॥

રમાજ્ઞાપાલિની રત્નભૂષણા રસશેવધિઃ ।
રક્તબીજાદિસંહર્ત્રી રક્તપાનકુતૂહલા ॥ ૪૯॥

રણપ્રિયા રણકરી રાકાચન્દ્રસમાનના ।
રાગસ્વરૂપિણી રાગાલાપસંસક્તમાનસા ॥ ૫૦॥

રાક્ષસી રાહુમુકુટા રાજ્ઞી રાજ્યસુખપ્રદા ।
રાજીવનયના રાત્રિપૂજિતા રાત્રિચારિણી ॥ ૫૧॥

રાધિકા રાજમાતઙ્ગી રાજહંસસમક્રમા ।
રાજરાજાર્ચિતા રાજ્યપાલિની રાજકન્યકા ॥ ૫૨॥

રાજ્યલક્ષ્મી રિપુહરા રીતિજ્ઞા રુષ્ટમાનસા ।
રુન્ધિની રુક્મિણી રુક્મવર્ણા રુધિરલાલસા ॥ ૫૩॥

રુદ્રાણી રુચિરપ્રખ્યા રુણ્ડા રુદ્રવિલાસિની ।
રુદ્રકાળી રુદ્રદુર્ગા રુધિરાર્દ્રીકૃતાકૃતિઃ ॥ ૫૪॥

રુષ્ટા રુદ્રકલા રુદ્રકોપા રુચિરભક્ષિણી ।
રુદ્રાવેશા રુદ્રમયી રુદ્રાસ્યા રુરુવાહના ॥ ૫૫॥

રુચાહસ્તા રૂપવતી રૂષિતાહારલોલુપા ।
રૂપલક્ષણસમ્પન્ના રૂપિણી રૂપવર્જિતા ॥ ૫૬॥

રૂપાર્કવિગ્રહા રૂપ્યશૈલમધ્યનિવાસિની ।
રોદસી રોષસંરક્તનયના રોગનાશિની ॥ ૫૭॥

રોહિણી રોષિણી રોષજ્વાલિની રોષવર્જિતા ।
રોષાવેશાહતારાતિમણ્ડલા રૌદ્રરૂપિણી ॥ ૫૮॥

રૌદ્રકોપા રઙ્ગમારી રઞ્જિની રઙ્ગમાલિની ।
રઞ્જિતા રમ્યવદના રંહો રાઙ્ગલધારિણી ॥ ૫૯॥

લવિત્રધારિણી લક્ષ્યા લકુલી લક્ષણોજ્જ્વલા ।
લક્ષાણ્ડનાયિકા લજ્જા લલિતા લક્ષણપ્રદા ॥ ૬૦॥

લઘિમા લક્ષ્યદા લભ્યા લઘુશ્યામા લયેશ્વરી ।
લલજ્જિહ્વા લબ્ધવર્ણા લવઙ્ગી લશુનાશના ॥ ૬૧॥

લધ્વી લતા લલત્કેશા લસન્તી લવણાશના ।
લયસ્થિત્યુદ્ભવાધીશા લઘુપૂજાપ્રસાદિની ॥ ૬૨॥

લક્ષ્મણાગ્રજસમ્પૂજ્યા લબ્ધસર્વમનોરથા ।
લમ્પટા લવસન્તુષ્ટા લઙ્કાનગરવાસિની ॥ ૬૩॥

લાવણ્યવિગ્રહા લાભદાયિની લાસ્યતોષિણી ।
લાસ્યપ્રિયા લાસ્યલોલા લાસિની લાજભક્ષિણી ॥ ૬૪॥

લાલસા લાસિકાલાસ્યા લાવણ્યગુણશાલિની ।
લાક્ષારસસવર્ણાભા લાઙ્ગલાયુધધારિણી ॥ ૬૫॥

લિપ્સા લિપ્તાલિઙ્ગપૂજ્યા લિઙ્ગિની લિઙ્ગવર્જિતા ।
લિપ્તગોરોચના લિપ્તચન્દના લિકુચસ્તની ॥ ૬૬॥

લિકુચાન્નપ્રિયા લીલા લીલાસૃષ્ટજગત્ત્રયા ।
લીલાવતી લુબ્ધમના લુબ્ધા લુઞ્છિતકેશિની ॥ ૬૭॥

લેલિહાનશિખા લેખા લેશપૂજાપ્રસાદિની ।
લોહિતા લોલનયના લોકેશી લોકપાલિની ॥ ૬૮॥

લોલમ્બમાલિની લોકવન્દિતા લોહિતેક્ષણા ।
લૌકિકી લૌકિકાચારા લમ્બમાનપયોધરા ॥ ૬૯॥

લં-બીજરૂપિણી વન્ધ્યા વરદા વસુમાલિની ।
વશિની વસુમધ્યસ્થા વસુમણ્ડલપૂજિતા ॥ ૭૦॥

વશિત્વદાયિની વજ્રધારિણી વલ્લકીપ્રિયા ।
વનિતા વન્દિતા વર્ણા વરિષ્ઠા વરદાયિની ॥ ૭૧॥

વસુધા વરુણારાધ્યા વત્સલા વટયક્ષિણી ।
વનમધ્યસ્થિતા વન્યા વસુદા વનમલ્લિકા ॥ ૭૨॥

વનકેલિરતા વક્રકેશિની વર્ણિની વરા ।
વલક્ષા વજ્રનિર્ઘોષા વરેણ્યા વનકન્યકા ॥ ૭૩॥

વરદા વલ્લભા વત્સા વરાભીતિલસત્કરા ।
વદન્તી વર્મિણી વશ્યા વલ્લકીવાદનપ્રિયા ॥ ૭૪॥

વરાભીતિલસત્પાણિર્વન્દારુજનપાલિની ।
વયસ્યા વર્ધિની વર્યા વહ્નિમણ્ડલવાસિની ॥ ૭૫॥

વહ્નિસ્વરૂપિણી વહ્નિનયના વલ્ગુભાષિણી ।
વરિવસ્યારતા વામા વારાહી વાયુવાહના ॥ ૭૬॥

વારુણીપાનસુપ્રીતા વાનરી વાહનપ્રિયા ।
વામાચારવતી વામમાર્ગપૂજાપ્રસાદિની ॥ ૭૭॥

વાણી વાયુસમારાધ્યા વાસવાદિસુરાર્ચિતા ।
વાદિત્રઘોષસુપ્રીતા વારુણીમદઘૂર્ણિતા ॥ ૭૮॥

વાગ્વાદિની વામકેશી વાજિવાહનગામિની ।

વિશ્વમ્ભરા વિશાલાક્ષી વિષમા વિષ્ણુસોદરી ॥ ૭૯॥

વિવિધાયુધસન્નદ્ધા વિષ્ણુમાયા વિરાણમયી ।
વિપુલાઙ્ગી વિઘ્નદાત્રી વિચિત્રા વિઘ્નહારિણી ॥ ૮૦॥

વિહાયસગતિર્વિદ્યાધરી વિશ્વવિમોહિની ।
વિયત્કેશી વિરૂપાક્ષી વિમલા વિકરાલિની ॥ ૮૧॥

વિશ્વગ્રાસા વિષ્ણુરૂપા વિજનાલયવાસિની ।
વિકારા વિપિનાવાસા વિશ્વાસા વિધિવન્દિતા ॥ ૮૨॥

વિભાવરી વિદ્રુમાભા વિદ્રુમાભરણોજ્જ્વલા ।
વિભૂતિર્વિષ્ણુવનિતા વિશદા વિશ્વમોહિની ॥ ૮૩॥

વિષમા વિબુધારાધ્યા વિનતા વિશ્વસાક્ષિણી ।
વિસ્ફોટકી વિરૂપાક્ષી વિન્ધ્યાચલનિવાસિની ॥ ૮૪॥

વિનોદા વિષ્ણુભગિની વિપ્રકારી વિશારદા ।
વિશાલા વિપુલા વિપ્રવન્દિતા વિપુલસ્તની ॥ ૮૫॥

વિશ્વવન્દ્યપદામ્ભોજા વિચિત્રાભરણોજ્જ્વલા ।
વિસ્તારજઘના વિદ્યા વિધુમણ્ડલવાસિની ॥ ૮૬॥

વિમાના વિમના વિશ્વા વિજયા વિપિનાલયા ।
વિવિધાન્નપ્રિયા વિત્તદાયિની વિપુલોદના ॥ ૮૭॥

વિષૂચિર્વિષસંહર્ત્રી વીરવન્દ્યપદામ્બુજા ।
વીરમાતા વીરશક્તિઃ વીરા વીરપરાક્રમા ॥ ૮૮॥

વીરાસના વીતિહોત્રનયના વીરવન્દિતા ।
વીરમારી વીરદુર્ગા વીથીસઞ્ચારલાલસા ॥ ૮૯॥

વીણાવાદનસુપ્રીતા વૃદ્ધા વૃજિનનાશિની ।
વેલા વેગવતી વેગા વેદાન્તપ્રતિપાદિતા ॥ ૯૦॥

વેગિતા વેદજનની વેષાઢ્યા વેત્રધારિણી ।
વેદના વેદનાહર્ત્રી વૈદિકી વૈરિમર્દિની ॥ ૯૧॥

વૈકુણ્ઠવાસિની વૈશ્વાનરમધ્યકૃતાલયા ।
વૈશાખપૂર્ણિમાપૂજાપ્રીતા વૈશ્વાનરેક્ષણા ॥ ૯૨॥

વૈદેહી વૈષ્ણવી વૈરિવિર્જિતા વ્યોમવાસિની ।
વ્યોમાલયા વ્યોમકેશી વૌષડ્ વ્યાલિવિભૂષિતા ॥ ૯૩॥

વંશાભિરક્ષિણી વંશદેવતા વેઙ્કટેશ્વરી ।
શમદા શર્મદા શબ્દરૂપિણી શરધારિણી ॥ ૯૪॥

શર્વાણી શબલા શક્રવન્દિતા શત્રુસૂદિની ।
શક્તિઃ શવાસના શક્તિવૃન્દસેવિતપાદુકા ॥ ૯૫॥

શકુન્તવાહના શમ્ભુમોહિની શશિશેખરા ।
શશાઙ્કાભમુખી શસ્ત્રધારિણી શમદમોજ્જ્વલા ॥ ૯૬॥

શમા શનૈશ્ચરપ્રીતા શવપઞ્ચકમઞ્ચગા ।
શરાસનકરા શબ્દબ્રહ્મરૂપા શરાસના ॥ ૯૭॥

શતાક્ષી શતભૂષાઢ્યા શરતલ્પાધિશાયિની ।
શરીરિણી શતસ્ફોટરૂપિણી શશિભૂષણા ॥ ૯૮॥

શારદા શારદારાધ્યા શામ્ભવી શાસ્ત્રવેદિતા ।
શાર્દૂલવાહના શાસ્ત્રવિદ્યા શાસનકારિણી ॥ ૯૯॥

શાન્તિઃશાન્તિમતી શાન્તિદાયિની શાન્તમાનસા ।
શાકમ્ભરી શાપહન્ત્રી શાકિન્યાદિસમન્વિતા ॥ ૧૦૦॥

શિવા શિવપ્રિયા શિલ્પકલા શિશુસમાકૃતિઃ ।
શિલ્પિની શિખિમધ્યસ્થા શિવદૂતી શિવઙ્કરી ॥ ૧૦૧॥

શિષ્ટા શિષ્ટસમાચારા શિષ્ટેષ્ટા શીતલામ્બિકા ।
શીતલા શીતલાદેવી શીતા શીતનિવારિણી ॥ ૧૦૨॥

શીલા શીલવતી શીધુપાનલોલુપમાનસા ।
શીતજ્વરહરા શીઘ્રવરદા શુક્રપૂજિતા ॥ ૧૦૩॥

શુદ્ધા શુષ્કા શુક્લવર્ણા શુષ્કાઙ્ગી શુભદાયિની ।
શુભા શુભાન્વિતા શુમ્ભદૈત્યસંહારિણી શુચિઃ ॥ ૧૦૪॥

શુચિસ્મિતા શુકપ્રીતા શુકાલાપા શુભોદયા ।
શુક્રવારપ્રિયા શૂન્યા શૂલિની શૂલધારિણી ॥ ૧૦૫॥

શૂરસેના શૂન્યરૂપા શૂન્યકેશ્વરનાશિની ।
શૂર્પહસ્તા શૂલરોગહારિણી શૂર્પમસ્તકા ॥ ૧૦૬॥

શ્રદ્ધા શ્રમહરા શ્રદ્ધાવતી શ‍ૃઙ્ગારનાયિકા ।
શ્રીઃ શ્રીમતી શ્રુતિજ્ઞેયા શ્રુતિબોધિતવૈભવા ॥ ૧૦૭॥

શ્રુત્યન્તજ્ઞેયસૌભાગ્યા શ‍ૃઙ્ખલામોચિની શ્રુતિઃ ।
શ્રોત્રિયા શ્રુતચારિત્રા શ્રોણિશોભાજિતાચલા ॥ ૧૦૮॥

શ્રીં-બીજનિલયા શેષમુકુટા શેષશાયિની ।
શેખરીકૃતશીતાંશુઃ શેમુષી શૈલવાસિની ॥ ૧૦૯॥

શૈવી શૈવાલયા શૈલકન્યા શૈલાદિવાહના ।
શૈવમઞ્ચકપીઠસ્થા શોભાજિતદિવાકરા ॥ ૧૧૦॥

શોભિની શોકશમની શોભા શોભનકારિણી ।
શોણાભા શોણિતપ્રીતા શોધિની શોભનાકૃતિઃ ॥ ૧૧૧॥

શોકહીના શોકહન્ત્રી શૌરિમાયાસ્વરૂપિણી ।
શૌણ્ડા શૌર્યપ્રદા શઙ્ખહસ્તા શઙ્કરભામિની ॥ ૧૧૨॥

શઙ્કરાભરણપ્રીતા શઙ્ખપદ્મનિધિસ્તુતા ।
શાન્ત્યતીતકલારૂપા શાન્તા ષટ્કોણવાસિની ॥ ૧૧૩॥

ષષ્ઠી ષટ્ચક્રનિલયા ષડધ્વાતીતરૂપિણી ।
સકલા સકલારાધ્યા સકલેષ્ટવરપ્રદા ॥ ૧૧૪॥

સપ્તમી સમયાચારા સપ્તસ્વરમયાકૃતિઃ ।
સર્વદા સર્પભૂષાઢ્યા સર્વમઙ્ગલદાયિની ॥ ૧૧૫॥

સગુણા સદ્ગુણા સત્ત્વગુણા સમરસા સમા ।
સભ્યા સરસ્વતી સર્વમઙ્ગલા સગુણાત્મિકા ॥ ૧૧૬॥

સર્વાર્થદાયિની સર્વમન્ત્રયન્ત્રાધિનાયિકા ।
સાકિનીરૂપિણી સાધ્યા સાધ્વી સાદાદિરૂપિણી ॥ ૧૧૭॥

સાક્ષિભૂતા સામરસ્યપરા સાધ્વસનાશિની ।
સિદ્ધમન્ત્રા સિદ્ધિદાત્રી સિદ્ધગન્ધર્વપૂજિતા ॥ ૧૧૮॥

સિતામ્ભોજાલયા સિદ્ધા સિન્દૂરતિલકોજ્જ્વલા ।
સીમા સીતા સીધુપાનપ્રિયા સીમાધિદેવતા ॥ ૧૧૯॥

સુમુખી સુભગા સુભ્રૂઃ સુન્દરી સુન્દરાનના ।

સુરાપ્રિયા સુવર્ણાભા સુરાધિપનમસ્કૃતા ॥ ૧૨૦॥

સુધા સુધાર્ણવાધ્યક્ષા સુરાપાનકુતૂહલા ।
સૂચકી સૂર્યનયના સૂકરી સૂકરાનના ॥ ૧૨૧॥

સૃણિહસ્તા સૃષ્ટિકર્ત્રી સેવ્યા સેનાગ્રગામિની ।
સૈરિભાસુરસંહર્ત્રી સોમાક્ષી સોમવલ્લરી ॥ ૧૨૨॥

સોમમણ્ડલમધ્યસ્થા સૌમ્યા સૌદામિનીપ્રભા ।
સૌભાગ્યદાયિની સૌખ્યદાત્રી સૌં-બીજરૂપિણી ॥ ૧૨૩॥

સમ્પત્કરી સંશયઘ્ની સમ્રાજ્ઞી સઙ્ગમક્ષમા ।
સંયુગામોદિની સંવિદ્રૂપિણી સન્તતિપ્રદા ॥ ૧૨૪॥

સન્ધ્યા સઙ્કષ્ટસન્દોહહન્ત્રી સન્ધાનકારિણી ।
સુન્દોપસુન્દસંહર્ત્રી સાન્દ્રાનન્દસ્વરૂપિણી ॥ ૧૨૫॥

સ્નિગ્ધૌદનપ્રિયા સ્નિગ્ધા સ્મૃતિઃ સ્મેરમુખામ્બુજા ।
હરદૂતી હયારૂઢા હસન્તી હરભામિની ॥ ૧૨૬॥

હરિદ્રાન્નૈકરસિકા હરિદ્રા હરિસોદરી ।
હતદૈત્યમહાસેના હઠાત્કારહતાસુરા ॥ ૧૨૭॥

હરિદ્રાલિપ્તસર્વાઙ્ગી હવિર્ભોક્ત્રી હલાયુધા ।
હાકિની હાસ્યસન્તુષ્ટા હાટકાભરણોજ્જ્વલા ॥ ૧૨૮॥

હાહાહૂહૂમુખસ્તુત્યા હાલામદવિઘૂર્ણિતા ।
હિમાંશુબિમ્બવદના હિમાલયકૃતાલયા ॥ ૧૨૯॥

હિમાંશુશકલોત્તંસા હિતા હિમકરેક્ષણા ।
હુમ્ફડુચ્ચારણપ્રીતા હુઙ્કારાતિભયઙ્કરા ॥ ૧૩૦॥

હુઙ્કારનિહતાનેકદૈત્યા હૂહૂપ્રપૂજિતા ।
હૃદ્યા હેમપ્રભા હેતિવિભૂષિતકરામ્બુજા ॥ ૧૩૧॥

હેમદાત્રી હેમવર્ણા હેલાનિહતદુર્જના ।
હેલાલોલા હૈમવતી હોત્રી હોતૃવરપ્રદા ॥ ૧૩૨॥

હોમાગ્નિકુણ્ડમધ્યસ્થા હોમકર્મૈકસાક્ષિણી ।
હૌં-બીજજપસુપ્રીતા હંસાક્ષી હંસવાહના ॥ ૧૩૩॥

ળં-બીજજપસુપ્રીતા ળં-બીજાક્ષરરૂપિણી ।
ક્ષપાપૂજનસુપ્રીતા ક્ષયરોગહરા ક્ષમા ॥ ૧૩૪॥

ક્ષપાકરલસન્મૌલિઃ ક્ષપાસઞ્ચારિણી ક્ષપા ।
ક્ષાલિતાશેષપાપૌઘા ક્ષામદુર્ભિક્ષનાશિની ॥ ૧૩૫॥

ક્ષિપ્રપૂજારતા ક્ષિપ્રફલદા ક્ષિપ્રકારિણી ।
ક્ષિપ્રપ્રસાદિની ક્ષિપ્રમારી ક્ષિતિધરા ક્ષિતિઃ ॥ ૧૩૬॥

ક્ષીણપાપા ક્ષીરપાનપ્રિયા ક્ષીરાન્નભોજિની ।
ક્ષુદ્રરોગહરા ક્ષુદ્રકૃત્યાનાશનકારિણી ॥ ૧૩૭॥

ક્ષુદ્રગ્રહાર્તિશમની ક્ષેત્રક્ષેત્રજ્ઞરૂપિણી ।
ક્ષેત્રપાલપ્રિયા ક્ષેમદાયિની ક્ષેત્રપાલિની ॥ ૧૩૮॥

ક્ષૌમામ્બરપરીધાના ક્ષૌદ્રામૃતરસપ્રિયા ।
ક્ષં-બીજજપસુપ્રીતા ક્ષં-બીજાક્ષરરૂપિણી ॥ ૧૩૯॥

અમ્બિકાનાદિનિધનારાધનપ્રીતમાનસા ।
ઇન્દ્રાણીન્દિરેશાનવલ્લભોદ્દણ્ડવિક્રમા ॥ ૧૪૦॥

ઉગ્રમાર્યુદિતાર્કાભદેહૈનઃકૂટનાશિની ।
ઐશ્વર્યદાયિન્યૈઙ્કારબીજવર્ણસ્વરૂપિણી ॥ ૧૪૧॥

ઓષ્ઠચ્છવિવિનિર્ધૂતબિમ્બાભૌઙ્કારમાતૃકા ।
અકારાદિવિસર્ગાન્તવર્ણમાલાસ્વરૂપિણી ॥ ૧૪૨॥

કમલા કલના કર્મસાક્ષિણી કરુણાલયા ।
કલ્મષઘ્ની કલિધ્વંસકારિણી કર્કશસ્વરા ॥ ૧૪૩॥

કાત્યાયની કાલરાત્રિઃ કિન્નરી કીર્તિદાયિની ।
કુરુકુલ્લા કુવલયદલનીલાયતેક્ષણા ॥ ૧૪૪॥

કુષ્ઠરોગપ્રશમની કૂશ્માણ્ડગ્રહનાશિની ।
કૃપા કૃપાવતી કૃષ્ણમારી કૃત્યાનિવારિણી ॥ ૧૪૫॥

કેવલા કોપવિધ્વસ્તસમસ્તા સુરમણ્ડલા ।
કૌમારી કૌશિકી કંસમર્દિની ખલનાશિની ॥ ૧૪૬॥

ગજારૂઢા ગતિર્ગાનલોલા ગીતવિશારદા ।
ગુર્વી ગુહપ્રિયા ગૂઢવિગ્રહા ગૃધ્રવાહના ॥ ૧૪૭॥

ગ્રામરક્ષાકરી ગ્રામદેવી ઘર્ઘરનાદિની ।
ચણ્ડમારી ચણ્ડઘણ્ટા ચણ્ડિકા ચારુવિક્રમા ॥ ૧૪૮॥

ચિરન્તના ચિત્રમાલ્યભૂષણા ચેટકાવૃતા ।
છલવિધ્વસ્તદૈત્યેન્દ્રા જયશ્રીર્જગદીશ્વરી ॥ ૧૪૯॥

ટઙ્કહસ્તા ઠાન્તમન્ત્રા ડમરુધ્વનિમોદિતા (હર્ષિણી) ।
ઢક્કાધરી તડિલ્લેખા દાડિમીકુસુમપ્રભા ॥ ૧૫૦॥

દેવી દેવનુતા દૈત્યમર્દિની દોષવર્જિતા ।
દન્તપઙ્ક્તિપ્રભાપુઞ્જતિરસ્કૃતદિવાકરા (રવિદ્યુતિઃ ) ॥ ૧૫૧॥

ધનધાન્યકરી ધાન્યમાલિની નવચણ્ડિકા ।
નાદબ્રહ્મમયી પાનપાત્રહસ્તા પરામ્બિકા ॥ ૧૫૨॥

ફલદા બન્ધનિર્મોક્ત્રી ભેરુણ્ડા ભયહારિણી ।
મદદ્રવા યશોદાત્રી રહસ્યા લલિતાલકા ॥ ૧૫૩।
વહ્નિરૂપા શ્મશાનસ્થા ષડઙ્ગપરિવારિતા ।
સમસ્તદેવવિનુતા સર્વદેવસ્વરૂપિણી ॥ ૧૫૪॥

સમસ્તશક્તિચક્રેશી હૃદયઙ્ગમરૂપિણી ।
ઇત્યુક્તં નામસાહસ્રં મહામાર્યાઃ શુભાવહમ્ ।
સર્વપાપપ્રશમનં સર્વરોગનિવારણમ્ ।
સર્વાર્થસાધકં પુણ્યમૈહિકામુષ્મિકાર્થદમ્ ।
સમસ્તદેવતાપ્રીતિદાયકં પરમાદ્ભુતમ્ ।
યઃ પઠેત્પ્રયતો દુર્ગાકાલે પ્રયતમાનસઃ ।
મહામાર્યાઃ પ્રસાદેન સ નૂનં લભતે શુભમ્ ।
મારીનામસહસ્રસ્ય નાન્યદસ્ય સમં ક્વચિત્ ।
પુરા વિરચિતં પૂર્વૈઃ નિરીક્ષ્ય સુપરિષ્કૃતમ્ ॥

ઇતિ તેતિયૂરવાસી બ્રહ્મશ્રી કૃષ્ણમૂર્તિશાસ્ત્રિણ્ વિરચિતં
શ્રીમહામારીસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

The author of the work is Sri. T. S. Krishnamoorthy shAstri.
He is popularly known as “kittu sir” in the neighboring villages.
Sri Kittu sir hails from the village Tediyur

(Thiruvarur district, Tamil Nadu) and served as sanskrit pandit in Vishnupuram and Semmangudi villages. Timeline: 4-July-1926 to 1-Jan-2009. He had worked in Thanjavur Saraswathi Mahal library in his later years.

This work is preserved by his student Dr. N. Veezhinathan, who received the President's award for Sanskrit in 2002.

Dr. Veezhinathan is the primary proof reader.
Encoded by Sankara Dass Nagoji nagojip at gmail.com
Proofread by Mrs. Renuka Kamakoti, PSA Easwaran

---

*Shri Mahamari Sahasranama Stotram*
pdf was typeset on September 13, 2020

Please send corrections to *sanskrit@cheerful.com*